# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-३ (SEM-6) | **प्रश्नपत्रम् – १** | गुणाः - ७० |
| विषयः – अनिवार्यसंस्कृतम् | **CF-3.6.6** | समयः - ११ तः २ |
| दिनाङ्कः – १६/४/२०१६ | सन्दर्भग्रन्थः – उत्तररामचरितम् | |

**प्रथमान्वितिः -१**

**प्रश्नः -१ कयोश्चिद् श्लोकद्वयस्य व्याख्या कार्या ।** ०८

(१) हृदि नित्यानुषक्तेन सीताशोकेन तप्यते ।
अन्तः प्रसृप्तदहनो जरन्निव वनस्पतिः ॥

(२) य एव मे जनः पूर्वमासीन्मूर्तो महोत्सवः ।
क्षति क्षारमिवासह्यं जातं तस्यैव दर्शनम् ॥

(३) एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः ।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ ॥

**प्रश्नः -२** चतुर्थाङ्कस्य कथासारं विलिख्य नाटके तस्य महत्त्वं निरूपयत ।

अथवा ०८

उत्तररामचरितस्य वैशिष्ट्यं सुचारुतया वर्णयन्तु ।

**प्रश्नः -३ द्वयोः टिप्पणी लेख्या ।** ०४

(१) जनकः (२) कौशल्या (३) अरून्धतीजनकयोः संवादः (४) लवः

**प्रश्नः - ४ निम्नेषु पञ्चानामतिलघूत्तराणि देयानि ।** ०५

(१) उत्तररामस्य रचयिता कः अस्ति ?

(२) उत्तररामचरिते कति अङ्काः सन्ति ?

(३) दाण्डायनः कः अस्ति ?

(४) चतुर्थाङ्कस्य नाम किम् ?

(५) रघुकुलस्य आदि पुरुषस्य किं नाम?

(६) उत्तररामचरितस्य प्रधान रसः कः अस्ति ?

(७) लवः कस्य शिष्यः आसीत् ?

**द्वितीयान्वितिः - २**

**प्रश्नः -५ कयोश्चिद् श्लोकद्वयस्य व्याख्या कार्या ।** ०८

(१) भो भो लव महाबाहो किमेभिस्तव सैनिकैः ।
एषोऽहमेहि मामेव तेजस्तेजसि शाम्यतु ॥

(२) इतिहासं पुराणं च धर्मप्रवचनानि च ।
भवन्त एव जानन्ति रघूणां च कुलस्थितिम् ॥

(३) अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः ।
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे ॥

**प्रश्नः -६** पञ्चमाङ्कस्य कथासारं वर्णयत । ०८

अथवा

उत्तररामचरितानुसारं करुणरसं वर्णयत ।

**प्रश्नः -७** **निम्नयोरेकस्योपरि टिप्पणी लेख्या ।** ०२

(१) चन्द्रकेतुः (२) कुमारविक्रमः (३) सुमन्त्रः

**प्रश्नः -८** **निम्नेषु द्वयोरतिलघूत्तरं लेख्यम् ।** ०२

(१) पञ्चमाङ्के कयोः पात्रयोः प्रमुखः संवादः अस्ति ?

(२) पञ्चमाङ्कस्य किं नामधेयम् अस्ति ?

(३) रामचन्द्रः कस्मिन् वंशे जातः ?

(४) लवस्य कानि अस्त्राणि जन्मसिद्धानि सन्ति ?

## तृतीयान्वितिः - ३

**प्रश्नः -९** **निम्नेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

(१) न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥

(२) विद्या कल्पेन मरुता मेघानां भूयसामपि ।
ब्रह्मणीव विवर्तानां क्वापि विप्रलयः कृतः ॥

(३) आश्वासस्नेहभक्तीनामेकमालम्बनं महत् ।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्तिसञ्चरः ॥

**प्रश्नः -१०** सप्तमाङ्कस्य कथासारं निरूपयत ।

अथवा ०८

भवभूतेः जीवनशैलीं लिखत ।

**प्रश्नः -११** **निम्नेषु द्वयोः टिप्पणी लेख्या ।** ०४

(१) सम्मेलनम् (२) रामः (३) भागीरथी (४) वृथा वः करुणामयि ।

**प्रश्नः -१२** **अधस्तनेषु पञ्च प्रश्नाः समाधेयाः ।** ०५

(१) कुमारप्रत्यभिज्ञानम् इति कस्याङ्कस्य संज्ञा ?

(२) उत्तररामचरिते प्रधाननायकः कः ?

(३) कस्य नाशे जगदरण्यं भवति ?

(४) लवकुशयोः जन्म कुत्र अभवत् ?

(५) लवकुशौ कस्य शिष्यौ स्तः ?

(६) षष्ठाङ्कस्य किं नामधेयम् ?

(७) सप्तमाङ्के कति श्लोकाः सन्ति ?

***